# Haridvaramahatmye Vishnutapoganganirgamasnanaphala Varnanam

# હરિદ્વારમાહાત્મ્યે વિષ્ણુતપોગઙ્ગાનિર્ગમસ્નાનફલવર્ણનમ્

## Document Information

Text title : Haridvaramahatmye Vishnutapoganganirgamasnanaphala Varnanam

File name : haridvAramAhAtmyeviShNutapogangAnirgamasnAnaphalavarNanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhargAkhyaH panchamAMshaH | adhyAyaH 29|| -

Latest update : June 18, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 1, 2024

*sanskritdocuments.org*

# Haridvaramahatmye Vishnutapoganganirgamasnanaphala Varnanam

# હરિદ્વારમાહાત્મ્યે વિષ્ણુતપોગઙ્ગાનિર્ગમસ્નાનફલવર્ણનમ્

(શિવરહસ્યાન્તર્ગતે શિવગૌરીસંવાદે)

ઈશ્વરઃ -

તપસ્યન્તં હરિદ્વારે હરિં દ્રષ્ટું સમાગતાઃ ।
બ્રહ્માણ્ડજં સમારુહ્ય સિન્ધુરં વૃત્રહા તથા ॥ ૨૯॥

લોકપાલગણાઃ સર્વે નારદાદ્યાશ્ચ શઙ્કરિ ।
દૃષ્ટ્વા તં હરિમત્યુગ્રતપસશ્ચ પરાયણમ્ ॥ ૩૦॥

બ્રહ્મા પ્રાહામરશ્રેષ્ઠ વિબુધૈઃ પરિવારિતઃ ॥

—

બ્રહ્મા -

કિં તે કાર્યં સમુદ્યુક્તં ભવતા તપ્યતે તપઃ ।
હિમવચ્છિખરે પુણ્યે લક્ષ્મ્યા સાકં હરે વદ ॥ ૩૧॥

તદા પિતામહવચો નિશમ્ય હરિરવ્યયઃ ।
ધ્યાત્વા માં સ તદા પ્રાહ પ્રણમ્ય પરમેશ્વરમ્ ॥ ૩૨॥

વિષ્ણુઃ -

વિશ્વેશ્વરોઽયં મદનાન્તકોઽયં
    ગઙ્ગાધરોઽયં ત્રિપુરાન્તકોઽયમ્ ।
ભગાન્તકોઽયં હિ યમાન્તકોઽયં
    મખાન્તકોઽયં ચ ભવાન્તકોઽયમ્ ॥ ૩૩॥

અસ્યૈવ દેવસ્ય મહેશ્વરસ્ય
    લિઙ્ગાર્ચનાત્ પૂતતરોઽસ્મિ ધન્યઃ ।
ચક્રં સહસ્રારમિદં સુદર્શનં
    લબ્ધં તથાઽન્યૈરપિ દુર્જયોઽહમ્ ॥ ૩૪॥

તસ્માત્પુરારિમારાધ્ય ચક્રં લબ્ધં સુદર્શનમ્ ।
દૈવાસુરે તદા યુદ્ધે જયાતેનાભવન્મમ ॥ ૩૫॥

તસ્માદુગ્રાન્મહાદેવાદ્ભવાદ્ભીમાત્કપર્દિનઃ ।
લપ્સ્યે મનોરથાન્ બ્રહ્મન્ તેનાહં તપસિ સ્થિતઃ ॥ ૩૬॥

બ્રહ્મા -
કસ્તે મનોરથો વિષ્ણો દેવેન ત્વં પ્રવોધિતઃ ।
પુરા લબ્ધવરશ્ચાસિ દેવદેવાન્મહેશ્વરાત્ ॥ ૩૭॥

વિષ્ણુઃ -
તત્તથૈવાદ્ય મે બ્રહ્મન્ મુરો નામાસુરો બલી ।
દૃષ્ટ્વા વિવસ્ત્રાં મત્પત્નીં રમાં સર્વાઙ્ગસુન્દરીમ્ ॥ ૩૮॥

ક્રીડન્તીં સખિભિઃ સાર્ધમસ્મિન્ સરસિ પાવને ।
કમલાન્યુપચિન્વન્તીં હરિદ્વારેશ્વરાર્ચને ॥ ૩૯॥

ચકમેઽથાસુરઃ કામાદ્જ્ઞાસ્તસ્યાશયો મયા ।
તદા ચક્રનિકૃત્તં તમકાર્ષં ચ વિધે તદા ॥ ૪૦॥

તદા સર્વે મુનિગણા મામવોચુઃ પ્રહર્ષિતાઃ ।
મુનયઃ -
સાધુ સાધુ હરે તેઽદ્ય કૃતં કર્મ સુદુષ્કરમ્ ।
તપસ્વિજનરક્ષાયૈ તપોવિઘ્નકરઃ સદા ॥ ૪૧॥

યજ્ઞઘ્નશ્ચ સદા પાપી સુરાણામપિ કણ્ટકઃ ।
કિઞ્ચાયં દેવદેવેશાત્પૂર્વં લબ્ધવરોઽસુરઃ ॥ ૪૨॥

ભક્તશ્ચ દેવદેવેશે તસ્માચ્છાપૈર્ન યોજિતઃ ।
ભક્તસ્ય હનને પાપમમિતં ખલુ વૈ હરે ॥ ૪૩॥

અત્ર તત્પાપશાન્ત્યર્થં હરિદ્વારેશમીશ્વરમ્ ।
તપસા તોષયસ્વાદ્ય પૂજયા ચ સદા હરમ્ ॥ ૪૪॥

સર્વત્ર નિષ્કૃતિર્દૃષ્ટા શિવદ્રોહે ન નિષ્કૃતિઃ ।
તસ્માચ્છિવૈકશરણઃ શિવાત્પૂતો ભવિષ્યસિ ॥ ૪૫॥

ઇત્યુક્તો મુનિભિર્બ્રહ્મન્ભક્તસ્ય હનનેન હિ ।
પ્રપતં પાપસમૂહં મે તસ્માદ્યક્ષ્યે મહેશ્વરમ્ ॥ ૪૬॥

સપાપેષ્વપિ ભક્તેષુ કિં પુનઃ પુણ્યકર્મસુ ।
ઇત્યુક્ત્વા દેવદેવેશં હરિદ્વારેશમીશ્વરમ્ ॥ ૪૭॥

પ્રણમ્ય પરયા ભક્ત્યા તુષ્ટાવ હરિરવ્યયમ્ ॥

—

વિષ્ણુઃ -
તરઙ્ગવિલસજ્જટં વૃષતુરઙ્ગખેલદ્ગતિં
    ભુજઙ્ગકૃતકઙ્કણં હરિશશાઙ્કભારોદ્વહમ્ ।
પતઙ્ગનયનં સદા મુહુરનઙ્ગદાહે રતં
    નિષઙ્ગપયસાન્નિધિં ક્ષિતિરથાઙ્ગમીશં ભજે ॥ ૪૮॥

અસઙ્ગિજનસઙ્ગતં મુનિજનાર્ચ્યલિઙ્ગસ્થિતં
    દૃશા કરુણયા તતં ગિરિસુતાર્ધભાગસ્થિતમ્ ।
વિધીન્દ્રસુરસંસ્તુતં મુહુરનન્યભાવં ગતં
    પ્રસીદતુ ભવાન્ હિ માં પરમપાપતાપૈર્હતમ્ ॥ ૪૯॥

શમ્ભો વિશ્વેશ ભર્ગ ત્રિનયન ભગવન્ પાહિ મામીશ દૃષ્ટ્યા
    દૃષ્ટ્વા તુષ્ટોઽહમીશ સ્થિતિલયજનનાપારસંસારમગ્નઃ ।
મત્પાપાનિ વિનાશયાશુ સુતરાં શુદ્ધે પદે દેહિ મે
    સ્નાતું વારિ મહાઘહારિ ભગવન્નસ્મિન્ વરે ભૂધરે ॥ ૫૦॥

—

સૂતઃ -
ઇત્થં હરિસ્તદા સ્તુત્વા બ્રહ્માદિવિબુધૈઃ સહ ।
તસ્મૈ દિશામિ તત્સર્વં પ્રત્યક્ષીકૃતવિગ્રહ ॥ ૫૧॥

ઈશ્વરઃ -
કિં ત્વત્પ્રિયકરં વિષ્ણો યન્મત્તઃ પ્રાપ્તુમિચ્છસિ ।
બ્રહ્માદ્યૈસ્તદ્દસ્વાદ્ય પ્રસન્નોઽહં તવાનઘ ॥ ૫૨॥

વિષ્ણુઃ પ્રણમ્ય દેવેશં વરમેનમયાચત ॥

વિષ્ણુઃ -
પુરા ત્રિપથગા શમ્ભો પાતાલાન્તરચારિણી ।
વિયત્પથગતા ત્વેકા ચૈકા પાતાલવાહિની ॥ ૫૩॥

બ્રહ્માણ્ડોરુકટાહાન્મે પૂર્વં વિક્રમતા મયા ।

મત્પાદઘટ્ટનાજ્જાતા સાપિ ભૂમિતલં ગતાઃ ॥ ૫૪॥

પીતા ચ જહ્નુના શમ્ભો નિલીના સા નૃપં ગતા ।
મત્પાદતોયં મત્પાપનાશકં નુ કથં ભવેત્ ॥ ૫૫॥

વિયત્પથગતા ત્વેકા ભગીરથવરાત્ ત્વયા ।
ગઙ્ગાગર્વોપશાન્ત્યર્થં ત્વયા મૂર્ધ્નિ વિધારિતા ॥ ૫૬॥

તામદ્યેશાન દેવેશ પ્રાર્થિતોઽસિ મયાદ્યહૃત્ ।
દેહિ શમ્ભો મહાદેવ ઇત્થં પ્રાર્થિતવાન્ હરિઃ ॥ ૫૭॥

હરિદ્વારમહાલિઙ્ગપાદપીઠાદ્વિનિર્ગતા ।
તદોત્સૃષ્ટા મયા ગઙ્ગા દિવ્યા ત્રિપથગા શિવે ॥ ૫૮॥

તુઙ્ગૈસ્તરઙ્ગૈર્વિતતા ફુલ્લપઙ્કજશોભિતા ।
કલ્હારમાલાવિતતા અવિમુક્તપન્થ ગતા ॥ ૫૯॥

હિમવચ્છિખરાદ્દેવિ મત્પાદતલનિર્ગતા ।
તસ્યાં વિષ્ણુસ્તદા લક્ષ્મ્યા બ્રહ્માદિવિબુધૈઃ સહ ॥ ૬૦॥

સ્નાત્વા સ્વપાપશાન્ત્યર્થમવિમુક્તં તદા ગતઃ ।
નાનાલિઙ્ગશતોપેતં સ વિશ્વેશં પ્રણમ્ય ચ ॥ ૬૧॥

સ્તુત્વા સ્તોત્રવરૈર્વિષ્ણુઃ બિલ્વપત્રૈઃ સુરૈઃ સહ ।
તુષ્ટાવ ચ મહેશાનં કૃપારાશીં તદામ્બિકે ॥ ૬૨॥

—

વિષ્ણુઃ -
ઉત્ફુલ્લકલ્હારવિલોલહારં મન્દારમલ્લીસુમપૂજિતાઙ્ઘ્રિમ્ ।
હલ્લીસલાસ્યપ્રિયયા સમેતં મલ્લિઙ્ગગં બિલ્વદલોત્તમાઙ્ગમ્ ॥ ૬૩॥

નિશારાજકલામૌલિં દેવરાજસમર્ચિતમ્ ।
રાજરાજસખં વન્દે ફણિરાજાઙ્ઘ્રિકઙ્કણમ્ ॥ ૬૪॥

—

ઈશ્વરઃ -
ઇત્થં સ વિષ્ણુઃ સ્તુતિભિસ્તથા માં સ્તુત્વા તદા બ્રહ્મમુખામરેન્દ્રૈઃ ।
વિનિર્ગતો મત્પદલોલલીલા મદ્રાઙ્ગસઙ્ગાબ્ધિતરઙ્ગરઙ્ગમ્ ॥ ૬૫॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે હરિદ્વારમાહાત્મ્યે વિષ્ણુતપોગઙ્ગાનિર્ગમસ્નાનફલવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભર્ગાખ્યઃ પઞ્ચમાંશઃ । અધ્યાયઃ ૨૯ ॥ -

- .. shrIshivarahasyam . bhargAkhyaH panchamAMshaH . adhyAyaH 29.. -

Notes:

Shri Vishnu along with Shri Lakshmi conducts worship of Shiva at foothills of Himalaya. An asura named Mura tries to misbehave with Lakshmi and incurs wrath of Vishnu, who then has to annihilate him. Having done this, Vishnu turns to worship Shiva for repentance, as Mura was a devotee of Shiva. Vishnu prays to Shiva to re-release Ganga from His dreadlocks so that He can bathe in it to redeem Himself from the sin of killing a Shiva devotee. Vishnu says that Ganga was initially released from His (Vishnu's) own great toe, hence He (Vishnu) will not be able to find the required redemption. He (Vishnu) iterates that Ganga has to be re-released by Shiva so that the redeeming effect can manifest for Him (Vishnu). Shiva obliges thus and Vishnu is relieved of His sin at Haridwareshwara - Haridwara being the place where Ganga was re-released due to efforts of Hari (Vishnu).

The shloka numbers have been maintained per the source text.

Proofread by Ruma Dewan

---

*Haridvaramahatmye Vishnutapoganganirgamasnanaphala Varnanam*
pdf was typeset on February 1, 2024

Please send corrections to *sanskrit@cheerful.com*